**Series : EFGH/S** **SET~4**

प्रश्न-पत्र कोड
**Q.P. Code** **65/S**

रोल नं.
Roll No. | | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Q.P. Code on the title page of the answer-book.

| नोट | NOTE |
|---|---|
| (I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं। | (I) Please check that this question paper contains **15** printed pages. |
| (II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें। | (II) Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं। | (III) Please check that this question paper contains **18** questions. |
| (IV) **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें।** | (IV) **Please write down the Serial Number of the question in the answer-book at the given place before attempting it.** |
| (V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे। # | (V) 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period. |

# संस्कृतम् (सम्प्रेषणात्मकम्)
# SANSKRIT (Communicative)

*अवधि : **होरात्रयम्***
*निर्धारित समय : **3** घण्टे*
*Time allowed : **3** hours*

*पूर्णाङ्काः : **80***
*अधिकतम अंक : **80***
*Maximum Marks : **80***

***General Instructions :***

*This question paper is divided into **four** sections.*

*It has total **18** questions.*

***Section 'A'** : 1 question no. 1.*

***Section 'B'** : 3 questions no. 2 to 4.*

***Section 'C'** : 7 questions no. 5 to 11.*

***Section 'D'** : 7 questions no. 12 to 18.*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य निर्देशाः***

*प्रश्नपत्रे **चत्वारः** भागाः सन्ति ।*

*प्रश्नपत्रे समेत्य **(18)** अष्टादशप्रश्नाः सन्ति ।*

***भागः 'क'** – 1 – प्रश्नसंख्या 1.*

***भागः 'ख'** – 3 – प्रश्नसंख्या 2 तः 4 पर्यन्तम् ।*

***भागः 'ग'** – 7 – प्रश्नसंख्या 5 तः 11 पर्यन्तम् ।*

***भागः 'घ'** – 7 – प्रश्नसंख्या 12 तः 18 पर्यन्तम् ।*

*प्रश्नानामुत्तराणि निर्देशानुसारं संस्कृतेन लेखनीयानि ।*

*प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया ।*

**भागः 'क'** ***[10 अङ्काः]***

**अपठितावबोधनम्**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *10*

अस्माकं जीवने विद्यालयस्य महती भूमिका अस्ति । विद्यालयः तु शिक्षायाः केन्द्रम् एव भवति । विद्यालयं गत्वा छात्रः न केवलं शिक्षां प्राप्नोति अपितु तस्य सर्वाङ्गीणः विकासः अपि भवति । प्रतिदिनं प्रातःकाले विद्यालयम् आगत्य छात्राः विविधान् विषयान् पठन्ति । गणितं, विज्ञानं, भाषाः, सामाजिक-विज्ञानम् आदयः विषयाः शिक्षायां महत्त्वपूर्णाः सन्ति । विद्यालये एतेषां विषयाणां शिक्षणं तु भवति एव, क्रीडाः, सङ्गीतं, चित्रकला आदयः अपि भवन्ति । यः छात्रः विद्यालयस्य नियमान् पालयति, सः शिक्षायाः लाभम् अवश्यमेव प्राप्नोति । शिक्षया एव छात्रस्य ज्ञानं वर्धते अपितु तस्य सामाजिकः विकासः अपि भवति । विद्यालये छात्राः सहयोगेन कार्याणि कुर्वन्ति, सामाजिकं, सांस्कृतिकं, नैतिकं चारित्रिकं च ज्ञानम् अपि लभन्ते । अतः अस्माकं जीवने विद्यालयस्य भूमिका महत्त्वपूर्णा अस्ति ।

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2 \times 1 = 2$

(i) अस्माकं जीवने विद्यालयस्य कीदृशी भूमिका अस्ति ?

(ii) कया छात्रस्य ज्ञानं वर्धते ?

(iii) के विविधान् विषयान् पठन्ति ?

(आ) पूर्णवाक्येन लिखत : (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$

(i) शिक्षायां के के विषया: महत्त्वपूर्णा: सन्ति ?

(ii) छात्राः विद्यालये कीदृशं ज्ञानं लभन्ते ?

(iii) कीदृश: छात्र: शिक्षाया: लाभं प्राप्नोति ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। $1 \times 1 = 1$

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्) $3 \times 1 = 3$

(i) 'लभन्ते' इति क्रियापदस्य कर्तृपदं किं भवेत् ?

(A) विद्यालये (B) मूल्या:

(C) छात्राः (D) सहयोगेन

(ii) 'विविधान्' इति विशेषणपदस्य विशेष्यपदं किम् ?

(A) छात्रा: (B) पठन्ति

(C) आगत्य (D) विषयान्

(iii) 'विद्यालय: तु शिक्षाया: केन्द्रम् एव भवति।' अत्र किं क्रियापदम् ?

(A) भवति (B) केन्द्रम्

(C) शिक्षाया: (D) विद्यालय:

(iv) 'हानिम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(A) केन्द्रम् (B) लाभम्

(C) विकासम् (D) केवलम्

## भागः 'ख' [15 अङ्काः]

## रचनात्मकं-कार्यम्

**2.** भवान् विजयः छात्रावासे वसति। भवान् गतसप्ताहे भारतयात्रां कृतवान्। यात्रायाः वर्णनं कुर्वन् स्वपितरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा पुनः लिखत। $10\times\frac{1}{2}=5$

गोयनका छात्रावासः

(i) ____________

आदरणीयाः (ii) ____________

सादरं-प्रणामाः !

अत्र सर्वं कुशलं तत्र अपि (iii) ____________ । गतसप्ताहे एव अहं (iv) __________ कृतवान्। वयं सर्वे दिल्लीनगरम् आगत्य (v) ____________ अभवाम। अस्यां यात्रायां वयं भारतस्य संस्कृतिम् अपश्याम। विशेषतः (vi) ____________ प्राकृतिकं सौन्दर्यम् अपूर्वम् आसीत्। अनुभवोऽयमद्भुतः आसीत्। गृहे अन्ये (vii) ____________ कथं सन्ति ? गृहे (viii) ____________ मम प्रणामाः निवेदनीयाः।

भवदीयः (ix) ____________ ।

(x) ____________ ।

**मञ्जूषा**

| |
|---|
| सदस्याः, विजयः, जयपुरतः, पितृ-महाभागाः!, सर्वेभ्यः, आनन्दिताः, दक्षिणभारतस्य, भारतयात्रां, पुत्रः, अस्तु। |

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत। *5×1=5*



**मञ्जूषा**

| |
|---|
| पशवः, जन्तुशाला, अनेके, गण्डकः, चित्रकः, मयूरः, दृश्यन्ते, दर्शकाः, उष्ट्रगीवः, बालकाः, पश्यन्ति, ध्वनिः, जन्तवः, पञ्जेर, प्रवेशपत्रम्। |

**अथवा**

निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत। *5×1=5*

**'आपणस्य वर्णनम्'**

**मञ्जूषा**

| |
|---|
| फलानि, क्रेतारः, विक्रेतारः, इतस्ततः, शाकानि, जनाः, सेवफलम्, कदलीफलम्, आलुकम्, गृञ्जनम्, वर्तते, मूल्यं, पृच्छन्ति, उच्चैः, आह्वयन्ति, अस्वच्छता, विविधाः। |

**4.** अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत : $10\times\frac{1}{2}=5$

भारतदेशस्य संस्कृति: विविधा प्राचीना च अस्ति । अस्माकं संस्कृत्यां (i) ________ महत्त्वं विशेषरूपेण अस्ति । एषा नदी देवनदी अपि कथ्यते । गङ्गा हिमालयस्य (ii) ________ उत्पन्ना भवति । तस्या: प्रवाह: (iii) ________ अस्ति । जना: गङ्गाया: दर्शनमात्रेण आत्मानं धन्यं मन्यन्ते । नदीषु गङ्गा (iv) ________ नदी अस्ति – एतत् तु सत्यमेव । धार्मिकजना: तस्यां स्नानं कुर्वन्ति अपूर्वां प्रसन्नताम् च (v) ________ । अस्या: जलं शुद्धं मोक्षप्रदायकं चास्ति । हरिद्वारनगरस्य (vi) ________ च महत्त्वं गङ्गनद्या: कारणात् एव वर्तते । अस्या: तटे अनेके (vii) ________ पर्वाणि च आयोज्यन्ते । सर्वेषां जनानां अस्यां नद्याम् (viii) ________ अस्ति । वस्तुत: गङ्गाया: प्रवाह: जीवनस्य प्रतीक: अस्ति । गङ्गाया: (ix) ________ अस्माकं कर्त्तव्यम् एव अस्ति । गङ्गानदीं पुन: स्वच्छं निर्मलं च कर्तुं सर्वै: (x) ________ करणीय: ।

**मञ्जूषा**

| |
|---|
| दिव्य:, प्रयत्न:, गङ्गनद्या:, उत्सवा:, आस्था, शिखरात्, काशीनगरस्य, पवित्रतमा, अनुभवन्ति, संरक्षणम् । |

**अथवा**

रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत : $5\times1=5$

*यात्री* – नमस्ते । इदं नगरं अतिरमणीयम् अस्ति । अहं ज्ञातुम् इच्छामि यत् एतत् नगरं किमर्थं प्रसिद्धम् अस्ति ?

*पर्यटनाधिकारी* – (i) ____________ । एतदर्थं प्रसिद्धम् अस्ति ।

*यात्री* – देहरादूननगरं कस्य प्रदेशस्य राजधानी अस्ति ?

*पर्यटनाधिकारी* – (ii) ____________ ।

*यात्री* – महोदय ! किम् अस्य नगरस्य समीपे अन्यं दर्शनीयस्थलम् अपि वर्तते ?

*पर्यटनाधिकारी* – (iii) ____________ ।

*यात्री* – धन्यवादा: ! कथयतु भवान्, मसूरीनगरं कथं गन्तुं शक्यते ?

*पर्यटनाधिकारी* – (iv) ____________ ।

*यात्री* – अहं तु अधुना श्रान्त: बुभुक्षित: च अस्मि ।

*पर्यटनाधिकारी* – काऽपि चिन्ता नास्ति (v) ____________ ।

**मञ्जूषा**

- मसूरीनगरं न अतिदूरम् अस्ति ।
- उत्तराखण्डप्रदेशस्य राजधानी देहरादूननगरम् एव ।
- तत्र प्रसिद्धं भोजनालयम् अस्ति ।
- अत्र अनेकानि दर्शनीयानि स्थानानि सन्ति ।
- बसबानेन त्वया तत्र गन्तुं शक्यते ।

## भागः 'ग' [25 अङ्काः]

## अनुप्रयुक्त-व्याकरणम्

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) ये अप्यतीता महारथाः पूर्वे ।

(ii) सः भयम् + करम् एकं विषधरं फूत्कारं कुर्वन्तं पश्यति ।

(iii) पिता तपस्तेपे ।

(iv) रमणीया सृष्टिः + एषा ।

(v) पदच्छेदः तु सुस्वरः ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) शारदा सर्वं ददाति इति (सा) अस्ति ।

(A) सर्वद (B) सर्वदः

(C) सर्वदा (D) सर्वदम्

(ii) तदा व्यासनारदौ प्रविशतः ।

(A) व्यासः च नारदः च (B) व्यासौ च नारदौ च

(C) व्यासम् च नारदम् च (D) व्यास नारदः

(iii) अस्मिन् अवसरे सेतोः निर्माणम् अपि क्रियते ।

(A) सेतोनिर्माणम् (B) सेतुनिर्माणम्

(C) सेतनिर्माणम् (D) सेतस्यनिर्माणम्

(iv) यथोचितं क्रियताम् – इति राजादेशम् ।

(A) उचितम् अनतिक्रम्य (B) चितम् अनतिक्रम्य

(C) यथा चितम् (D) यथो चितम्

(v) चञ्चोः देशे माणिक्यरत्नं स्यात् ।

(A) चञ्चोदेशे (B) चञ्चुदेशे

(C) चञ्चदेशे (D) चञ्चु च देशे च

**7.** अधोलिखितवाक्येषु रेखाङ्किकतपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) दीयमानं निधानतां याति।

(A) निधान + तल् (B) निधान + ल्यप्

(C) निधान + त्व (D) निधान + मतुप्

(ii) किं ते महत्त्वम् ?

(A) महत् + त्व (B) मह + त्वम्

(C) महत् + तल् (D) महा + त्व

(iii) यूथपति: बुद्धि + मतुप् आसीत्।

(A) बुद्धिमत् (B) बुद्धिमान्

(C) बुद्धिवान् (D) बुद्धिवत्

(iv) विराट-नगरं तु ऐतिहासिकं स्थानम्।

(A) ऐतिहास + ठक् (B) एतिहास + ठक्

(C) इतिहासिक + ठक् (D) इतिहास + ठक्

(v) पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थल + ङीप् इयम्।

(A) स्थला (B) स्थली

(C) स्थल: (D) स्थलीङ्प

**8.** वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत : (केवलं प्रश्नत्रयम्) *3×1=3*

*नदीम:* – कृष्ण ! (i) ____________ कुत्र गम्यते ?

*कृष्ण* – (ii) ____________ तु आपणं गच्छामि।

*नदीम:* – त्वं तत्र किमर्थं गच्छसि ?

*कृष्ण* – तत्र शाकफलानि क्रेतुं गच्छामि।

*नदीम:* – किं त्वया प्रतिदिनं फलानि (iii) ____________ ?

*कृष्ण* – न, मम पित्रे फलं रोचन्ते।

*नदीम:* – तव गृहे क: भोजनं पचति।

*कृष्ण* – मया (iv) ____________ पच्यते।

**मञ्जूषा**

| |
|---|
| भोजनम्, त्वया, खाद्यन्ते, अहम्। |

**9.** कालबोधकशब्दैः अधोलिखित-कार्यक्रमं पूरयत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) विद्यालये ____________ 7:00 वादने प्रार्थना भवति।

(ii) तदा ____________ 7:45 वादने कक्षा भवति।

(iii) ____________ 9:15 वादने अल्पाहारस्य समयम्।

(iv) ____________ 12:30 वादने भोजनावकाश: भवति।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) __________ तु वयम् एतानि स्थलानि द्रष्टुम् उत्सुका: स्म:।

(ii) कलशात् __________ विषधर: निर्गच्छति।

(iii) वत्स ! __________ त्वम् इदं चक्रं वाञ्छसि ?

(iv) अहं प्रकृति: __________ युष्माकं जननी।

(v) शुश्रूषा श्रवणं __________ धीगुणा: सन्ति।

**मञ्जूषा**

| |
|---|
| एव, बहि:, अधुना, किमर्थम्, च। |

**11.** अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय विकल्पेभ्य: उचितपदं चित्वा वाक्यानि पुनः लिखत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) वाङ्मयं <u>तपं</u> उच्यते।

(A) तपस् (B) तप:

(C) तपे (D) तपम्

(ii) मातर: शिशून् <u>कथयति</u>।

(A) कथयामि (B) कथयसि

(C) कथयाम: (D) कथयन्ति

(iii) मेष: अश्वशालां प्रविशति <u>भूमे</u> च लुठति।

(A) भूमि: (B) भूमिम्

(C) भूमौ (D) भूमे:

(iv) आचार्येण <u>कीदृशम्</u> अनर्थ: कृत: ?

(A) कीदृश (B) कीदृश:

(C) कीदृशी (D) कीदृशा:

## भागः 'घ' [30 अङ्काः]

## पठितावबोधनम्

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *5*

दुष्टबुद्धिः तु तयोः वार्तां श्रुत्वा झटिति एव क्षेत्रं गतः । तत्र अश्वत्थमूलं खनित्वा तं सुवर्णकलशं प्राप्तवान् । यदा स तस्य आवरणम् अपसारयति तदैव भयङ्करम् एकं विषधरं फूत्कारं कुर्वन्तं पश्यति । भीतः स कलशं पुनः आवृत्य तं च आदाय मित्रस्य गृहं समागतः । स्वमित्रं सर्पेण मारयितुम् इच्छन् सः भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान् ।

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) सः गृहाभ्यन्तरे किं क्षिप्तवान् ?

(ख) झटिति क्षेत्रं कः गतः ?

(ग) दुष्टबुद्धिः कस्य आवरणम् अपसारयति ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) दुष्टबुद्धिः कलशं कथं प्राप्तवान् ?

(ख) सः किम् इच्छन् कलशं क्षिप्तवान् ?

(ग) कलशम् आवृत्य दुष्टबुद्धिः कुत्र समागतः ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'पश्यति' इति क्रियापदस्य कर्तृपदं किम् ?

(ख) 'भयङ्करम्' इति पदस्य किं विशेष्यपदं प्रयुक्तम् ?

(ग) 'सर्पम्' इति पदस्य किं पर्यायपदं प्रयुक्तम् ?

**13.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *5*

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कृष्ण: कदा इन्द्रियाणि नियन्त्रणं कर्तुं कथयति ?

(ख) अर्जुन: कानि वशीकृत्य कामं हन्यात् ?

(ग) श्लोके क: वदति ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) श्रीकृष्ण: आदौ अर्जुनं किं कर्तुम् उपदिशति ?

(ख) इन्द्रियाणि किं कृत्वा अर्जुन: कामस्य हननं कुर्यात् ?

(ग) कीदृशं कामं प्रजहि ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'प्रजहि' इति क्रियापदस्य कर्तृपदं किम् ?

(ख) 'एनम्' इति पदस्य विशेषणपदं किम् प्रयुक्तम् ?

(ग) 'अर्जुन' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *5*

*हिमांशु* – अहं चिन्तयामि यत् 'अरुण:' तु सूर्यस्य पर्याय: । अस्य प्रकाश: सर्वप्रथमम् इमं प्रदेशं स्पृशति । अत: अरुणस्य प्रदेश: अरुणाचल: ।

*पर्यटनाधिकारी* – शोभनम् । उचितम् उक्तम् । हिमाद्रितुङ्गशृङ्गै: सुशोभिता सूर्योदयभूमि: इयम् । अत: अरुणाचल: । अस्मिन् प्रदेशे पञ्चाशदधिका: नद्य: प्रवहन्ति । विपुला च अत्र वनसम्पदा । वनौषधीनां तु अयं स्रोत: एव । पुष्पाणां समृद्धि: सुगन्धि: च मनोहर: । सर्वत्र हरीतिमा । शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृति: एव न विविधा मनोहरा च प्रत्युत संस्कृति: अपि ।

*सर्वे* – एवम्

*सुधाकर:* – अस्य प्रदेशस्य राजधानी का ?

*पर्यटनाधिकारी* – 'ईटानगरम्' अस्य प्रदेशस्य राजधानी ।

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कस्य प्रकाश: सर्वप्रथमम् इमं प्रदेशं स्पृशति ?

(ख) अयं प्रदेश: केषां स्रोत: ?

(ग) सर्वत्र का अस्ति ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) अस्मिन् प्रदेशे कति नद्य: प्रवहन्ति ?

(ख) इयं भूमि: कै: सुशोभिता ?

(ग) 'ईटानगरम्' कस्य प्रदेशस्य राजधानी ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'प्रवहन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ख) 'इमम्' इति पदस्य विशेष्यपदं किं प्रयुक्तम् ?

(ग) 'प्रचुरा' इति पदस्य पर्यायपदं किमस्ति ?

**15.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं पञ्चप्रश्नाः) *5×1=5*

(i) कृषकस्य क्षेत्रे श्रमं कृत्वा सः धनम् अर्जितवान्।

(ii) कामस्य नाशाय इन्द्रियाणि वशीकरणीयानि।

(iii) काकः सुप्तान् प्रबोधयति।

(iv) पाठकस्य षट् गुणाः सन्ति।

(v) गुरुणाम् आज्ञा अविचारणीया।

**16.** मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत : $4\times\frac{1}{2}=2$

यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः॥

**अन्वयः**

(i) __________ केन अपि यत् (ii) __________, तस्य तत्त्वार्थनिर्णयः येन (iii) ____________ शक्यः भवेत् स (iv) __________ इति ईरितः।

**मञ्जूषा**

| |
|---|
| विवेकः, प्रोक्तम्, येन, कर्तुम्। |

**अथवा**

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थं पूरयित्वा पुनः लिखत : $4\times\frac{1}{2}=2$

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःख नास्ति त्यागसमं सुखम्॥

**भावार्थः**

अस्मिन् लोके विद्या एव वास्तविकं (i) _________ अस्ति। (ii) __________ एव मूलं तपः अस्ति। दुःखस्य मूलकारणं वस्तुभिः सह (iii) ___________ अस्ति। अन्येषां कृते (iv) ___________ एव सुखस्य आधारः अस्ति।

**मञ्जूषा**

| |
|---|
| आसक्तिः, नेत्रम्, सत्यभाषणम्, त्यागः। |

**17.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) य: धर्मप्रदां वाचं त्यक्त्वा परुषां वदेत्।

(A) पुरुषाम्

(B) कोमलाम्

(C) कठोराम्

(D) वचनम्

(ii) प्रच्छन्नभाग्य: प्रभूतं धनम् अर्जितवान्।

(A) वित्तम्

(B) कलशम्

(C) कलहम्

(D) वचनम्

(iii) शरीरविमोक्षणात् प्राक् य: वेगं सोढुं शक्नोति।

(A) प्रात:

(B) परम्

(C) प्रियम्

(D) पूर्वम्

(iv) शैलानां पारं द्रष्टुं समर्थ: भव।

(A) पर्वतानाम्

(B) नदीनाम्

(C) मेघानाम्

(D) सागराणाम्

(v) अस्माकं ऐक्यं तु जगत्प्रसिद्धम्।

(A) स्वरम् (B) रूपम्

(C) स्वभावम् (D) एकता

**18.** अधोलिखितां कथां मञ्जूषापदैः रिक्तस्थानानि पूरयित्वा पुनः लिखत : $8\times\frac{1}{2}=4$

एकस्मिन् नगरे चन्द्र: नाम एक: (i) ___________ आसीत्। तस्य पुत्रा: प्रतिदिनं वानरै: सह खेलन्ति स्म। तेभ्य: स्वादिष्टं भोजनं यच्छन्ति स्म। तत्र (ii) ___________ एकं मेषयूथम् अपि वसति स्म। एक: मेष: (iii) ___________ लोलुप: आसीत्। स: (iv) ___________ सर्वमेव खादति स्म। ते सूपकारा: तं (v) ___________ मारयन्ति स्म। एतत् (vi) ___________ वानरयूथपति: (vii) ___________ 'एतेषां कलह: वानराणां हिताय न।' स: सर्वान् कपीन् (viii) ___________ आहूय अवदत्।

**मञ्जूषा**

| |
|---|
| एकान्ते, नृप:, अचिन्तयत्, दृष्ट्वा, बालवाहनयोग्यम्, अर्धज्वलितकाष्ठै:, अहर्निशम्, रसनाया:। |